श्रीजैन-आत्मानन्दग्रन्थरत्नमाला-षष्टितमं रत्नम् (६०)

मुनिप्रवरश्रीमद्-रामभद्रमुनिनिर्मितं

# प्रबुद्धरौहिणेयम्।

न्यायाम्भोनिधि-श्रीमद्विजयानन्दसूरि-शिष्य-प्रवर्तक-
श्रीमत्कान्तिविजय-मुनिविनेयमुनिचतुरविजयस्य
शिष्येण मुनिपुण्यविजयेन
संशोधितम्।

तच्च

अणहिल्लपुरपत्तनवास्तव्यश्रीमालिज्ञातीय-श्रेष्ठि-
गोदड-तनुज-अनोपचन्द्र-भार्या-जीवकोर-
किंचिद्दत्तद्रव्यसाहाय्येन
प्रसिद्धकर्त्री

श्रीजैन-आत्मानन्दसभा. भावनगर.


विक्रमसंवत् १९७४ } मूल्यमाणकद्वयम्। रू. ०-२-० { वीरसंवत् २४४४

प्रकाशक-वल्लभदास त्रिभुवनदास गांधी सेक्रेटरी श्री जैन आत्मानन्द सभा.
मुद्रक-मणिभाई मथुरभाई गुप्त श्री आर्य सुधारक प्रेस रावपुरा-बडोदरा
ता. ५-१-१८.

श्रीजैन-आत्मानन्दग्रन्थरत्नमाला-षष्टितमं रत्नम् (६०)

मुनिप्रवरश्रीमद्-रामभद्रमुनिनिर्मितं

# प्रबुद्धरौहिणेयम् ।

न्यायाम्भोनिधि-श्रीमद्विजयानन्दसूरि-शिष्य-प्रवर्तक-
श्रीमत्कान्तिविजय-मुनिविनेयमुनिचतुरविजयस्य
शिष्येण मुनिपुण्यविजयेन
संशोधितम् ।

तच्च

अणहिल्लपुरपत्तनवास्तव्यश्रीमालिज्ञातीय-श्रेष्ठि-
गोदड-तनुज-अनोपचन्द्र-भार्या-जीवकोर-
किंचिद्दत्तद्रव्यसाहाय्येन
प्रसिद्धकर्त्री

श्रीजैन-आत्मानन्दसभा. भावनगर.

विक्रमसंवत् १९७४ } मूल्यमाणकद्रम्मम् । रू. ०-१-० { वीरसंवत् २४४४

प्रकाशक-वल्लभदास त्रिभुवनदास गांधी सेक्रेटरी श्री जैन आत्मानन्द सभा.
मुद्रक-मणिभाई मथुरभाई गुप्त श्री आर्य सुधारक प्रेस रावपुरा-बडोदरा
ता. ५-१-१८.

श्रीमतां वादिदेवसूरीणां प्रभावकचरित्रान्तर्गतेन

" श्रीभद्रेश्वरसूरीणां गच्छभारं समर्प्य ते ।
जैनप्रभावनास्थेमनिरुपधेयसि स्थिताः ॥
रसयुग्मरवौ वर्षे १२२६ श्रावणे मासि संगते ।
कृष्णपक्षस्य सप्तम्यामपराह्णे गुरोर्दिने ॥
मर्त्यलोकस्थितं लोकं प्रतिबोध्य पुरन्दरम् ।
बोधका इव ते जग्मुर्दिवं श्रीदेवसूरयः ॥
त्रिभिर्विशेषकम् ॥ "

अनेन पद्यत्रितयेन १२१६ वर्षे दिवंगतत्वं प्रकटमेव । एतेषामेव च सूरिवराणां प्रशिष्यत्वादेतद्ग्रन्थकर्तुस्त्रयोदशशताब्द्यन्तर्भावित्वं स्पष्टमेव ।

श्रीमद्यशोवीरसत्तासमयोऽपि त्रयोदशशताब्दीय एवेति प्राचीनजैनलेखसंग्रहद्वितीयभागान्तर्गतश्रीजालोरदुर्गलेखात्स्पष्टमेवावबुध्यते । स चायम्—

" ॐ ॥ संवत् १२२१ श्रीजाबालिपुरीयकाञ्चनगिरिगढस्योपरि प्रभुश्रीहेमसूरिप्रबोधितश्रीगूर्जरधराधीश्वरपरमार्हतचौलुक्यमहाराजाधिराजश्रीकुमारपालदेवकारिते श्रीपार्श्वनाथसत्कमूलबिम्बसहितश्रीकुवरविहाराभिधाने जैनचैत्ये । सद्विधिप्रवर्तनाय बृहद्गच्छीयवादीन्द्रश्रीदेवाचार्याणां पक्षे आचन्द्रार्कं समर्पिते ॥

सं० १२४२ वर्षे एतद्देशाधिपचाहमानकुलतिलकमहाराजश्रीसमरसिंहदेवादेशेन भां० पासूपुत्र-भां० यशोवीरेण समुद्धृते श्रीमद्राजकुलादेशेन श्रीदेवाचार्यशिष्यैः श्रीपूर्णदेवाचार्यैः। सं० १२५६ वर्षे ज्येष्ठ सु० ११ श्रीपार्श्वनाथदेवे तोरणादीनां प्रतिष्ठाकार्ये कृते। मूलशिखरे च कनकमयध्वजादण्डस्य ध्वजारोपणप्रतिष्ठायां कृतायां। सं० १२६८ वर्षे दीपोत्सवदिने अभिनवनिष्पन्नप्रेक्षामध्यमण्डपे श्रीपूर्णदेवसूरिशिष्यैः श्रीरामचन्द्राचार्यैः सुवर्णमयकलशारोपणप्रतिष्ठा कृता॥ शुभं भवतु॥ छ॥"

संशोधनसमयेऽस्य नाटकस्यैकमेव पुस्तकं पत्तनस्थवाडीपार्श्वनाथभाण्डागारात् सुश्रावक वाडीलाल-हीराचन्द्र-द्वारा समुपलब्धम्। तच्चातिशुद्धं पुस्तकं कचित् कचिद्गलितपत्रम्। तथापि तेन संशोधितमिदम्। कचित्कचिद्वर्णगलितत्वात्स्वमत्या-न्यूनपूरणेन नवीनं मुद्रितम्। तत्र श्रीमद्भिः संशोध-कैर्दृष्टिर्निधेया—

श्रीमज्जगद्गुरुश्रीविजयधर्मसूरीश्वरपादसेवक

मुनिचन्द्रविजयः

॥ अर्हम् ॥

॥ शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरिभ्यो नमः ॥

पण्डितप्रकाण्डश्रीमद्रामभद्रमुनिविरचितं

# प्रबुद्धरौहिणेयम् ।

यस्योपदेशपदमप्यवगत्य नित्यं
मुक्तिश्रियं सनुभूतः सपदि प्रपन्ने ।
स्वर्भूर्भुवःकमलकोशविकाशनैक-
प्रद्योतनः स जयताज्जिनवर्धमानः ॥ १ ॥

( नान्द्यन्ते )

सूत्रधारः—

सत्पुंसां चरितानि यानि कविभिर्व्यावर्णितान्यद्भुतं
सौभाग्यस्य पदं भवन्ति भुवने विस्तारमायान्ति च ।
तद्भावर्णनतत्परा अपि चिरं यान्ति प्रशस्तिं क्षिते-
स्तान्युच्चैश्चरितानि मे च कवयः प्रीणन्तु रङ्गाङ्गणम् ॥२॥

( पुरोऽवलोक्य सप्रमोदं ) अहह ! कथं प्रवर्तनेऽपि हर्षप्र-

दर्शं दर्शमहर्निशं भगवती दुग्धाम्बुधेरात्मजा
मन्ये तद्भयभङ्गुरेयमुररीचक्रे चिराचापलम् ॥ ८ ॥

रविशलः—कथय तावत्किं किमादिदेशैनं मुमूर्षुर्लोहखुरोऽस्य जनकः ? ।

सिंहलः—इदमादिदेश । वत्स ! निष्णातोऽसि शस्त्रपरिश्रमे, अलङ्कर्मीणोऽसि पश्यतोहरकर्मणि, अनाहतमतिर्भोऽसि मन्त्रुत्पन्नमतौ, जितश्रमोऽसि जङ्घालतायां, तत्र [न] काचिन्मे मनसि वैधुर्यावस्था संस्थापयमस्थितस्य । किन्तु निजपितरि प्ररूढमौढवात्सल्यातुच्छस्य वत्सस्य विशेषेणादिश्यते । यदि मदीयस्तनयोऽसि तदा यः किल सकलसुरासुरमनुष्यसंकुलायां परिषदि श्रीमहावीराभिधानः सद्धर्ममाचष्टे तदीयमस्मत्कुलाचारपाटच्चरं वचः कर्णाभ्यर्णसंचरिष्णुतां गच्छद्रक्षणीयमिति ।

रविशलः—अहो ! स्वसंतानतानवापनोददक्षा पितुः शिक्षा । (पुनर्विलोक्य) सिंहल ! दृश्यन्त्वया सर्वेऽप्यमी वसन्तोत्सवोन्मदिष्णुमनसः प्रभास्वरकान्तस्वराभरणभूषिता विचित्रवासोविशेषोन्मिषल्लक्ष्मीका लोकाः ? तदेहि त्वरिततरं गत्वा रौहिणेयाय संपादयामः ।

(इति निष्क्रान्तौ ।)

॥ विष्कम्भकः ॥

(ततः प्रविशति यथानुरूपोचितरचितनेपथ्यो रौहिणेयः कपिलरुक्केशः केकराक्षः पिङ्गलनासापुटः प्रवरश्च ।)

रौहिणेयः—( सर्वतोऽवलोक्य सकौतुकं ) अहह ! वसन्तावतारव्यतिकरसुन्दरभागस्य सुभगम्भविष्णुमकरन्दोद्यानस्य सौन्दर्यलक्ष्मीः । तथाहि—

कचिन्मल्लीवल्लीतरलमुकुलोल्लासितवना
कचित्पुष्पामोदभ्रमदलिकुलारब्धवलया ।
कचिन्मत्तक्रीडत्परभृतवधूगानसुभगा
कचित्कूजत्पारावतरतिलीलासुललिता ॥९॥

किं चात्र—

केचिद्वल्लवराजभामुजलताश्लेषोल्लसन्मन्मथाः
केचिन्मीलितलोचनाः पुलकिताः कुर्वन्ति गीतध्वनिम् ।
केचित्कामिनतापिकाधरदलं [illegible] पिबन्त्यादरात्
[illegible] पश्य [illegible] ॥१०॥

अन्यच्च—

[illegible]
[illegible]
आपाति [illegible]
[illegible]

( [illegible] )

यदेते पूर्वोक्ताः प्रकटविभवापास्तधनदा
गतश्रीकाश्रीकाश्रयमनुसरन्ति प्रियसखाः ।
मदोन्मादभ्रान्तस्वपरजनभावव्यतिकरा-
स्तदेतन्मन्येऽहं मम सुकृतराशेर्विलसितम् ॥ १२ ॥

तदेतन्मध्याद्यदि किमप्यपह्रियते मनस्तोषणं भूषणं रौद्रं दारिद्र्यं वस्त्रं भुवनजनमनःकेकिकादम्बिनी काचित्कामिनी तदद्यतनं दिनमवन्ध्यं भवति । यतः—

वणिग् वेश्या कविर्भट्टस्तस्करः कितवो द्विजः ।
यत्रापूर्वोऽर्थलाभो न मन्यते तदहर्वृथा ॥ १३ ॥

( नेपथ्ये )

(क) वल्लहसंगसुहियाण सुहय ! सुहओ स एस महुमासो।
पुण तव्विओअविहुराण नूणं मरणं विसेसेइ ॥१४॥

रौहिणेयः—( विलोक्य ससम्भ्रमं ) कथमेतन्मनुजमिथुनमापतति ?। तत्कथं मयि अन्तिकमापतिष्यते ?। किमेतौ कुरुतः ?। अतस्तावत्क्षणमेकं सहकारतरुणा तिरोधाय निरूपयामि ।

( इति सत्वरस्तथा करोति । )

( ततः प्रविशति प्रियार्पितभुजपल्लवः सलीलं नवयौवनः पुरुषः सर्वाङ्गीणाभरणभूषिता यौवनारम्भविशेषोन्मिषितलावण्या च वनिता । )

पुरुषः—( वनितां प्रति ) प्रिये मदनवति !,

---

( क ) वल्लभसङ्गसुखितानां सुभग ! सुखदः स एव मधुमासः ।
पुनस्तद्वियोगविधुराणां नूनं मरणं विशेषयति ॥

रौहिणेयः—( वनितामवलोक्य सस्पृहं )

किं शृङ्गारमयी ? किमु स्मरमयी ? किं दर्पलक्ष्मीमयी ?

किं पीयूषमयूखदीधितिमयी ? किं पुण्यवीथीमयी ? ।

किं वा विष्टपसृष्टिसौष्ठवमयी ? किं रूपसंपन्मयी ?

नो जाने विधिनेयमम्बुजमुखी कैश्चिद्दलैर्निर्मिता ॥२०॥

किञ्च—

मुक्तासीमन्तिकास्याः शिरसि वितनुते विभ्रमं कृत्तिकाणां

हारः शृङ्गारयोनेर्निधिकलशलसच्छूचूलाभस्तनान्तः ।

धत्तश्चन्द्रार्कबिम्बश्रियमनुसरतः कर्णयोः कुण्डले द्वे

कूजत्काञ्चीकलापः कलयति जघने शक्रकोदण्डकान्तिम् ॥

वनिता—(क) पियथम ! निसग्गदोहग्गसंसग्गसहाए अलं मे वत्तणकहाए। अहवा तुम्हारिसाणं निरन्तरसरणाणं गुणमणिमहोयहीणं लावण्णनिहीणं विहियनिरवग्ग[ह ? ]सोहग्गेणं कहं न धण्णणिज्जगुणभायणं भवामि ।

तं किं पि घडइ भुवणंमि माणसं पिम्मचंगिमागारं।

जस्संसग्गेण इयरं पि नूणं पावेइ परभायं ॥२२॥

पुरुषः—( सखेदं सर्वाङ्गमालिङ्गितुमिच्छति । )

---

(क) प्रियतम ! निसर्गदौर्भाग्यसंसर्गसहया अलं मे वर्णनकथया । अथवा युष्मादृशानां निरन्तरशरणानां गुणमणिमहोदधीनां लावण्यनिधीनां विहि-[illegible]सौभाग्येन कथं न वर्णनीयगुणभाजनं भवामि ।

तत्किमपि घटते भुवने मानसं प्रेमचङ्गिमागारम् ।

[illegible] संसर्गेण इतरदपि नूनं प्राप्नोति [illegible]

**रौहिणेयः**—( सविस्मयं शबरं प्रति ) अहो ! राकाशशाङ्कयोरिव सौदामिनीजलदयोरिव प्रीतिप्रद्युम्नयोरिवानयोरेव संयोगः श्लाघ्यते । भुवनमप्येताभ्यां विभूषितम् ।

नित्यं शिल्पिकलाकलापवसतेर्वस्तूनि संतन्वत–
　स्तत्किञ्चिद्भुवनाद्भुतैकगुणभृद्वस्त्वत्र निष्पद्यते ।
आत्मानं स्वगुणैः प्रकाशयति यद्यस्माच्च विश्वत्रयी–
　सृष्टिः पङ्कजविष्टरस्य नितरां धत्ते ध्रुवं सौष्ठवम् ॥२३॥

**वनिता**—( सर्वतोऽवलोक्य ) ( क ) पाणनाह !,
चित्तानिलेण कामस्स विजयजत्तुम्मुहस्स भुयणम्मि ।
आउहसालाउ व पयडियाउ पुप्फियवणालीओ ॥ २४ ॥
सदेहि पुप्फाणि अवचणिय एदंमि सीदलकदलीहरे चिरयालफलिदमणोरथमहीरुहफलं कीडारससुहमणुहवाव ।

**पुरुषः**—( स्वगतं )

ऋतुर्वसन्तः स्वस्तुल्यं घनं निर्विजनं वनम् ।
पक्ष्मलाक्षी स्मरक्षीबा दृष्टः पुण्यैश्चिरादहम् ॥ २५ ॥

( प्रकाशं ) प्रिये मदनवति ! अद्य चिराचिन्तितमनोरथोऽनुभवतीमवततार । ततो यत्किमपि प्राणेश्वरी ममादिशति

( क ) प्राणनाथ !
चैत्रानिलेन कामस्य विजययात्रोन्मुखस्य भुवने ।
आयुधशाला इव प्रकटिताः पुष्पितवनाल्य. ॥
हे पुष्पाणि अवचीय एतस्मिन् शीतलकदलीगृहे चिरकालफलितमनो-
क्रीडारसमनुभवावः ।

सदस्तु। किन्तु कः किल प्रथमं प्रचुरप्रसूनान्यादायैतत्कदलीगृहमनुसरति ? । (इति प्रतिज्ञाय पृथक्पृथग्दिशो गमनं नाटयतः । )

वनिता—( पुष्पावचयं नाटयति । )

रौहिणेयः—

पुष्पार्थं प्रहिते भुजेऽनिलचलच्चीनांशुकाविष्कृत
सल्लावण्यलसत्प्रभापरिधिभिर्दोर्मूलमूलङ्कषः ।
ईषन्मेघविमुक्तविस्फुरदुडुज्योत्स्नाभरभ्राजित-
व्योमाभोगमृगाङ्कमण्डलकला रोहत्यमुष्याः स्तनः ॥२६॥

अन्यच्च, अरे शबर ! नेयमस्य करगृहीनी, किन्तु महेभ्यकुलोत्पन्ना स्वैरिणी काचिदित्यनुमानतो निश्चीयते । यदि वा किमनया प्रस्तुतप्रयोजनविघ्नकारिण्या मीमांसया ? । भवतु, या काचिद्भवति गर्लनामपहरामि । ( इति तदभिमुखं परिक्रम्य पुनः पश्चादभिमुखं कतिचित्पदानि दत्त्वा शबरं प्रति) यदीमां नेदीयःप्रदेशस्थिते भर्त्तर्यपहरिष्ये तन्नूनमियं पूत्करिष्यते । मत्प्राणितस्यापि संदेह । तदत्रस्थ एव क्षणं मर्षयामि यावदसौ दूरान्तरं व्रजति ।( इति ऊर्ध्वस्थ एव तद्गमनमवलोकयति । ) कथं तिरोभूत एवासौ तत्तस्मिन्नहमेनामपहरामि । त्वं पुनरेनमुपपतिं केनापि कैतवेन निर्वापयेगच्छेः ।

शबरः—( क ) एवं किल्लिस्सं ।

रौहिणेयः—( तामुपसर्प्य सानुनयमिव ) सुतनु ! किमर्थ-

(क) एवं करिष्ये ।

मस्मादृशेऽप्याज्ञाकारिणि जने सति आत्मनैवंविधमनुचित-मनुष्ठीयते ? ।

वनिता—( सहसा तमवलोक्य साशङ्कं स्वगतं ) (क) को एस दुरायारो ? । जो किल,

अदिनिदयदुट्ठरउद्दखुद्दरत्तच्छिछोहदुप्पिच्छो ।
आवद्धपिंडियजुगो अइपिंगलकुडिलघणकेसो ॥२७॥

ता किं मण्णे एस तक्करो ?, अहवा कह नामेह तक्कर-संभवो ?, जदो अणेगलोगसंकुलमज्झमुज्जाणं। जइ वा ससुर-कुलपरिकओ कोऽवि, तप्परिचएण ममेयं पयंपियं। यदि ताउं ममं मा उवलक्खेदु। ( इत्यनाकर्णितकेन पुनः पुष्पाण्युपचिनोति।)

रौहिणेयः—किमिति मामवगणयसि ?, यद्वाक्यं नाकर्णयसि ।

वनिता—( अन्यतो विलोकयन्ती ) (ख) कोऽवि(ऽसि) तुमं ?।

रौहिणेयः—( सगर्वं ) आ ! कथं मामपि न जानासि ?,

येनाखिलं पुरमिदं स्वपराक्रमेण
हृत्वा धनं जनमनीयत निर्धनत्वम् ।

---

(क) क एष दुराचारः ? । यः किल,

अतिनिर्दयदुष्टरौद्रक्षुद्ररक्ताक्षिक्षोभदुष्प्रेक्ष्य ।
आबद्धपिण्डिकायुगोऽतिपिङ्गलकुटिलघनकेशः ॥

तत्किं मन्ये एष तस्करः ?। अथवा कथं नामेह तस्करसंभवः ?। यतोऽनेकलोकसंकुलमध्यमुद्यानम्। यदि वा श्वशुरकुलपरिकरः कोऽपि, तत्परिचयामेतत्प्रजल्पितम्। यदि तावन्मां मा उपलक्षयतु।

(ख) कोऽपि (ऽसि) त्वम् ?।

नीतं समुद्यतिमिह स्वकुलं च येन
सोऽहं मलिम्लुचपतिर्ननु रौहिणेयः ॥ २८ ॥

घनिता—( सभयं ) (क) कथं सच्चकं य्येव तुमं तक्करो? ।

रौहिणेयः—अथापि किं कश्चित्संदेहः ?, तस्करोऽस्मि ।

घनिता—( वेपमाना तरुमूले निलीयते । )

रौहिणेयः—घनिते ! अग्रतो भव ।

घनिता—( पूत्कर्तुमिच्छति । )

रौहिणेयः—( सक्रोधं ) यदि पापे ! पूत्करिष्यसि ततस्ते शिरः कर्तयिष्ये ।

घनिता—( कथं कथमपि साहसमवष्टभ्य ) (ख) अरे दुराचार ! यदि मम पिययमो एदंमि अंतरे आगमिस्सदि ता नूणं न सुंदरं संपज्जिस्सदि ।

रौहिणेयः—कस्ते प्रियः ? ।

घनिता—(ग) जो इत्थ ( इत्यर्धोक्ते तूष्णीमास्ते । )

रौहिणेयः—संमत्यहमेव भवत्याः स्वामी, किमन्येन ? । तद्यदि मामितं भीणासि तत्त्वरितमग्रतो भव । नो चेदनयाऽसिधेनुकया शिरः कूष्माण्डपातं पातयिष्यामि । ( इति छुरिकामुत्क्षिपति । )

---

(क) कथं सत्यमेव त्वं तस्करः ? ।

(ख) अरे दुराचर ! यदि मम प्रियतमो एतस्मिन्नन्तरे आगमिष्यति तन्नूनं न सुन्दरं संपत्स्यते ।

(ग) योऽत्र ।

येनापि वन्दीकृता ?, तत्कमप्यभ्यर्णवर्तिनं जनं पृच्छामि तद्गमनशुद्धिम् । ( इति दिशोऽवलोकयति । )

शबरः—( प्रकटीभवति । )

पुरुषः—( समवलोक्य ) यदि पुनरसौ किमपि कथयति । ( इति समुपगम्य नीचैः स्वरं ) भद्र ! क्वापि दृष्टा अभिनवाभरणभूषिता वनं परिभ्रमन्ती भवता वनिता ? ।

शबरः—(क) इत्थ न कावि दाव दिट्ठा, परं फल-पल्लसंगधिदनन्दे लोमसभयल्लाल्लनयने पल्लिवालपुलिसपलिखित्ते उज्जाणं भमंते दिट्ठे केऽवि एगे पुलिसे ।

पुरुषः—( स्वगतं ) नूनं तेन तद्भर्त्रा भाव्यम् । (प्रकाशं) भद्र ! कियद्दूरे दृष्टः ? ।

शबरः—(ख) एस ग्येव लुवण्णंतलिदे संपदं किंपि मंत्रयंते चिट्ठदि ।

पुरुषः—( स्वगतं ) निश्चितं मम मारणेच्छया किमपि मन्त्रयते । ( प्रकाशं ) भद्र ! ज्ञातं त्वया किमप्यालोचयन्ति ? ।

शबरः—( सकपटं वर्णौ पिधाय ) (ग) हगे न किं पि जानामि । ( इत्यभिधाय निष्क्रान्तः ।

---

( क ) अत्र न कापि तावद् दृष्टा । परं फलपल्लवसंगन्धिनन्दने लोमशभल्लूकनयने पल्लिपालपुरुषपरिक्षिप्ते उद्यानं भ्रमन् दृष्टः कोऽपि एकः पुरुषः ।

( ख ) एष एव सुवर्णतिलके सांप्रतं किमपि मन्त्रयन् तिष्ठति ।

( ग ) वयं ( " आदंवरदेदंसे " सि० ४-४-३०१ ) न जानीमः ।

श्मशाननिवासी रौहिणेयः । भवतु, गोपनं भवान् क्व गमिष्यति ? ।

शबरः—( क ) मायागिहमज्झे किं पि चोरिदं (हरिदुं) रोहिणेएण णिवेशिदे हगे ।

पर्वतकः—प्रथम यदि स्वं निवेदय रौहिणेयाय । अह-मपि प्रयोजनाय गच्छामि ।

( इति उभावपि निष्क्रान्तौ । )

॥ विष्कम्भकः ॥

---

( ततः प्रविशति रौहिणेयः शबरश्च । )

[ रौहिणेयः — ] किं निर्णीतं भवता ? ।

शबरः—( ख ) अज्ज एशे महद्धिवशेट्ठिपुत्ते पुरंपि धणदत्तगेहंमि वीवाहिदे लच्छीए सरिशं पविश्शदि, तदो तत्थ गन्तव्वं ।

रौहिणेयः—( विलोक्य सस्मितं ) अहो ! निजरूपानु-रूपं विदूषकरूपं परिधृतवानसि । अहं तु अत्रैव गतः मरी-चिकागतं यथासमयोचितं नेपथ्यमाधास्ये । ( ऊर्ध्वमवलोक्य )

शूलीभिषतमिश्रकुण्डलिकुलं विश्वाञ्जनव्याकुलं
नीत्वा भागमर्धपविश्यारिमयी भ्रान्त्वा च विश्वं विपत्

---

( क ) एतन्नगरमध्ये किमपि हर्तुं रौहिणेयेन निवेशितोऽहम् ।

( ख ) अद्यैष महर्द्धिकश्रेष्ठिपुत्रः एतस्मिन् धनदत्तगेहे विवाहितो लक्ष्म्या सदृशं प्रविशति, तत्तत्र गन्तव्यम् ।

कल्लोलविलास स्वर्णकिताभरणदृविरः सहस्रमहस्तनुः शिरः-
शैलोल्लसितकौस्तुभाधिकश्री छिन्नलक्ष्मगुणानयः सवृत्तो यः उ-
मापाश्रमवर्तीम । ।

शौरिणोपः—अयं मावतुरः, इयं चास्य वधूः । कौ पु-
नारस्य हितौ ? ।

चापरः—( क ) अयं पुत्तरनंवव्वलीओ गुमटाभिहाणो
जणओ । इयं च सव्वंगीणरणालंकरणसाविदा कुंकुमचउविद-
सामद्दा मणोल्लमा माआ । ( इति दर्शितमथ दर्शयति । )

शौरिणोपः—किमभिधानः सुतः ? ।

चापरः— ( ख ) मणोम्भवो णाम ।

शौरिणोपः—( सा विलोक्य )

आकारः स्मरगोचरः स्वकमृता वक्रप्रभा स्पर्धते
नीलाम्भोजमविजिष्णुनी च नयने कण्ठोऽस्य कम्बुच्छविः ।
वाचः स्निग्ध[मुरा]लपल्लवपट्टनः पादौ प्रवालप्रभौ
वर्णः स्वर्णसवर्णविभ्रमपरः किं वर्ण्यतेऽयं वरः ? ॥२॥

किञ्च—

मौलौ यस्य मसाम्यशिरयति निमिरं शेखरः स्वर्णभाभिः
कण्ठे मुक्ताकलापः किरति दिविगुरोर्मण्डलस्योचितश्रीः ।
मानस्पार्द्धिस्यमस्मी क्षिपति मणिरुचा हस्तगृधं च हस्ते

---

( क ) अयं स्थूलवक्षाभरणः गुमटाभिधानो जनकः । इयं च सर्वा-
ङ्गीणरत्नालङ्करणशोभिता कुङ्कुमचर्चितदेहा मनोरमा माता ।

( ख ) मनोभवो नाम ।

यतो बहपायानि श्रेयांसि । ततो गृहमध्य एव कारयिष्यामो वर्धापनकोत्सवम् ।

श्रेष्ठी—( साक्षेपं ) किमर्थम् ? ।

रत्नाकरः—किं न श्रुतं भवद्भिर्दक्षिणस्यां दिशि क्षुतम् ? ।

श्रेष्ठी—श्रेष्मविकारा अपि यद्यस्मदारम्भाणां भङ्गमाधास्यन्ति तत्कथं दुर्जनानपाकरिष्यामः ? तत्कारय यथादिष्टम् ।

( रत्नाकरस्तथा कारयति । )

रौहिणेयः—( शबरं प्रति साश्चर्यं ) पश्याहो ! पश्य ।

स्फूर्जत्तूर्यनिनादनृत्यदखिलस्फाराङ्गनाराङ्गना-
   वर्गस्वर्गगजेभकुम्भयुगलापीनस्तनास्फालनैः ।
त्रुट्यन्मौक्तिकमालिकामलगलन्मुक्ताफलम्भोज्ज्वलो
   धत्तेऽम्भोधितटीसमानयदनामेतद्गृहमाङ्गणम् ॥ ७ ॥

अन्यच्च—

ताम्बूलरागरुचिरस्फुरदोष्ठबिम्बाः
   कालेयकस्तबकपूर्णललाटपट्टाः ।
कौसुम्भवस्त्ररुचिरं जितदिग्विभागा
   गायन्ति जारपरवनिताः कलमङ्गलानि ॥ ८ ॥

शबरः—( क ) एसे समये, तदो एदाणं मज्झे गच्छिय अहं नयेमि । तए उण सचिंतिदमणुट्ठिदव्वं । ( इति तन्मध्ये

---

( क ) एष समयः, तत एतासां मध्ये गत्वाऽहं नृत्यामि । त्वया पुनः

ततो वहणपात्राणि क्षेपयामि । ततो गृहमध्य एव कारयिष्यामो वर्धापनकोत्सवम् ।

श्रेष्ठी—( साक्षेप ) किमर्थम् ? ।

रत्नाङ्गदः—किं न श्रुतं भवद्भिर्दक्षिणस्यां दिशि क्षुतम् ? ।

श्रेष्ठी—श्लेष्मविकारा अपि यशस्वदारम्भाणां भङ्गमापादयन्ति तत्कथं दुर्जनानपाकरिष्यामः ? तत्कारय यथादिष्टम् ।

( रत्नाङ्गदस्तथा कारयति । )

रौहिणेयः—( शबरं प्रति साश्चर्यं ) पश्यारे ! पश्य ।

स्फूर्जत्पूर्वनिनादतूर्यदगिन्त्कारसाराङ्गना-
वर्गोत्सर्गसंभ्रमकुम्भयुगलापीनस्तनास्फालनैः ।
त्रुट्यन्मौक्तिकमालिकातलगलन्मुक्ताकदम्बोज्ज्वलां
पश्याम्भोधिवदोघमानपटलामेतद्गृहाङ्गणम् ॥ ७ ॥

अन्यच्च—

ताम्बूलरागरुचिरस्फुरदोष्ठबिम्बाः
कालेयकस्तरकपूर्णलसत्पदाः ।
कौसुम्भवस्त्ररुचिरं जितदिग्विभागा
गायन्ति जातवनिताः कलमङ्गलानि ॥ ८ ॥

शबरः—( क ) एसे समये, सदो एदाणं मज्झे गदिअ अहं नयेमि । तए उण सचिंतिदमणुट्ठिदव्वं । ( इति तन्मध्ये

( क ) एष समयः, तत एतेषां मध्ये गत्वाहं नयामि । त्वया पुनः

गायकनर्तकनटविटभण्डकलावेदवादचतुराणाम् ।
अर्थः कथमभविष्यल्लोके यद्युत्सवा न स्युः ॥ ९ ॥

शबरः—( सहर्षमिव ) ( क ) जयदु जयदु समग्गनेगमवग्गचूलामणी सुभदसेट्ठी । अहो ! सामिणो सयलकलाकलावकोसल्लं । सामि ! दा महापसादो किदो । जिदं जिदमम्हेहिं । ( इति कटीतटं वादयन्नृत्यति । )

( सर्वे हसन्ति । )

रत्नाङ्गदः—( सकौतुकं सोपहासं च )
कर्णौ सर्पफणोपमौ पिठरिकाधःपीतवर्णा तनु-
र्नेत्रं चक्रसुदग्रदन्तयुगमतिस्थूलं त्रिकोणं शिरः ।
मार्जाराक्षिसदृक्षपक्षियुगलं द्विशाश्च कूर्चे कचा
भालं कालकरीरकर्परनिभं रूपं तदस्याद्भुतम् ॥ १० ॥

मनोरमा—( ख ) वत्स रयणंगय ! अहं गिहे गन्तूण सव्वे पउणेमि । तुम्भेहिं पुण गिहप्पवेसमुहुत्तं सिग्घं साधिदव्वं ( इत्यभिधाय निष्क्रान्ता । )

( रत्नाङ्गदो विहस्य पुरुषस्य कर्णे एवमेव । )

पुरुषः—एष शीघ्रमागच्छामि । ( इत्यभिधाय निष्क्रान्तः । )

---

( क ) जयतु जयतु समग्रनैगमवर्गचूडामणिः शुभदश्रेष्ठी । अहो ! स्वामिनः सकलकलाकलापकौशलम् । स्वामिन् ! तव महाप्रसादः कृतः । जितं जितमस्माभिः ।

( ख ) वत्स रत्नाङ्गद ! अहं गृहे गत्वा सर्वं प्रगुणयामि । युष्माभिः पुनर्गृहप्रवेशमुहूर्तं शीघ्रं साधयितव्यम् ।

( नेपथ्ये )

( क ) अहं नागमिस्सं । गच्छ तुमं ।

श्रेष्ठी—रत्नाङ्गद ! कोऽयम् ? ।

रत्नाङ्गदः—स्वामिन् ! वामनिकाऽऽनीयते ।

श्रेष्ठी—किमर्थम् ? ।

रत्नाङ्गदः—नृजलमृते पुरीषस्य नान्यद् द्वितीयम् । अस्य नर्तकस्य वामनिकैव संयुज्यते ।

(ततः प्रविशति पुरुषेण सानुनय बाह्वो. समाकृष्यमाणा वामनिका ।)

वामनिका—( सरोषं ) ( ख ) अहं न नच्चिस्सं न नच्चिस्सं ।

पुरुषः—रत्नाङ्गद ! एषा समानीता ।

रत्नाङ्गदः—( सकौतुकं तामुपसर्प्य ) वामनिके ! एष त्वदीयोत्सवस्तत्किं न नृत्यते ? । (इति तां बलात्कारेण रङ्गमध्ये प्रविश्य प्रवेश्य स्वस्थानमुपसर्पति । )

वामनिका—( ग ) नच्चदु जो को वि नच्चदि । अहं उण न नच्चिस्सं । जदो न इत्थ सगुणमणुस्साण मग्गो ।

शबरः—(सक्रोधवक्रदृष्ट्या विलोक्य सेर्ष्यं)*

---

( क ) अहं नागमिष्यामि । गच्छ त्वम् ।

( ख ) अहं न नर्तिष्यामि न नर्तिष्यामि ।

( ग ) नृत्यतु यः कोऽपि नृत्यति । अहं पुनर्न नर्तिष्यामि । यतो नात्र सगुणमनुष्याणां मार्गः ।

---

* अत्र कियान्धिन्पाठस्त्रुटितः ।

[ यामनिका—] (क) जत्थ एदारिसा स(सु) रूवा नचकलाकुसला तत्थ किमम्हारिसाणं नच्चिदुं जुत्तं ? ।

शबरः—(ख) अहो ! कुहितकंजिणीए पीयूष(पेऊस)-कुण्डेण समं सोहग्गसमसीसी । अहो ! खलकुट्टीए गुलेण सद्धिं पालिप्पद्धी । (रत्नाङ्गदं प्रति) लयणंगय ! पिचुमन्दकन्दलीए रसालरसस्स य केलिसे तुमए संयोगे किते ? । ( [इति] निभृतं हसन्नन्यतोऽवलोकयति । )

यामनिका—(सरोषं) (ग) अरे अट्टयणीतणंधय ! आभव्वं पभूदाविरु(भू)ददोसघसमसीसीसंट्ठिदच्छुदाभंधय ! इर्फ दाव मम ठाणे नच्चेसि अवं पुण ममं पि उवहसेसि ता तुमं तधा गच्छाहि जधा न पुणो दीसेसि । (इति तत्समुखं करा-ङ्गुलीर्मोटयति । )

शबरः—(घ) आ दासी(ए)धीदे ! पुरिसपवंचणेक्कचिट्ठो-

(क) यत्रैतादृशा सुरूपा नृत्यकलाकुशलास्तत्र किमस्मादृशां नर्तितुं युक्तम् ? ।

(ख) अहो ! कथितकाञ्जिकायाः पीयूषकुण्डेन समं सौभाग्यसमशीर्षी । अहो ! खलकुट्या गुडेन सार्धं प्रतिस्पर्धा । रत्नाङ्गद ! पिचुमन्दकन्दल्या रसालरसस्य च कीदृशस्त्वया संयोगः कृतः ? ।

(ग) अरे अट्टजनीस्तनन्धय ! अभव्य प्रभूताविर्भूतदोषसमशीर्षीस्थितच्छुदान्धक ! एवं तावन्मम स्थाने नृत्यसि अथ पुनर्ममापि उपहससि तस्मात् तथा गच्छ यथा न पुनर्दृश्यसे ।

(घ) आः दास्याःपुत्रि ! पुरुषप्रवञ्चनैकचेष्टितप्रभृते ! निर्गतदौ-र्भाग्यदुष्टे ! सौभाग्यमण्डनमुद्रं मालय (अपि) [illegible] गच्छ यत्र गच्छ यत्र प्रथमं के पीतवर्णं गतं । भविष्यसि [illegible] । [illegible] दूरी-कृतेन [illegible] त्वं गर्विता । तदस्माकं तदेव..............[illegible] यदि ।

रत्नाङ्गदः—(अक्षिनिकोचं कुर्वन् सरोषमिव) अरे ! एषा वराकी नागरदया उत्थापयितुमारब्धा । तदलं दूरीभूय तिष्ठ । यथेदं यथेष्टं नृत्यति ।

शबरः—(क) भवतु स्वामिन् ! एते दूरीभूय तिष्ठामः । ( इति सर्वे मिलित्वा दूरे गत्वा [illegible] । )

रत्नाङ्गदः—वामनिके ! यथाभिरुचितं नृत्यताम् ।

वामनिका—( वक्रोक्तिं कृत्वा ) (स्वगतम्) कथं नूनं विना नर्तिष्ये ? ।

रत्नाङ्गदः—( सक्रोधमिव ) अरे ! किं न पश्यत पूर्वं नृत्यन्तीं वामनिकां ? यत्पूर्वं न वादयत । तदधुना वादयत ।

( सर्वे वाद्यं कुर्वन्ति । )

( वामनिका हस्तावुत्क्षिप्य नृत्यति । )

( [illegible] कृत्वा [illegible] [illegible] कर्णे कृत्वा [illegible] नर्तयति । )

( [illegible] सर्वे हसन्ति । )

रौहिणेयः—( स्वगतम् ) अहो ! [illegible] । तदहं सांप्रतं स्वविचिन्तितमनुतिष्ठामि । ( इति निष्क्रान्तः । )

श्रेष्ठी—( विहस्य ) रत्नाङ्गद ! अहो ! [illegible] [illegible] । यथाहि—

---

(क) [illegible] ! [illegible] ।

(ख) [illegible] [illegible] !।

रत्नाङ्गदः—(अङ्गुलिस्फोटं कुर्वन् सरोषमिव) अरे ! एषा वराकी तावदनया उद्घाटितुमारब्धा । तत्क्षणं दूरीभूय तिष्ठ । यथेष्टं यथेष्टं नृत्यति ।

शाबरः —(क) रअणंगअ ! एशे तुण्हिक्कीए चिट्ठदि ।
( इति वंशं प्रक्षिप्य तूर्णं समीपदेशमनुसरति । )

रत्नाङ्गदः—यामलिके ! यथारुचितं नृत्यताम् ।

यामलिका—( सकौतुकं कृत्वा ) (ख) ता कधं तूरं विणा णच्चिस्सं ? ।

रत्नाङ्गदः —( गन्धर्वकान्प्रति ) अरे ! किं न पश्यत नृत्तसतृष्णां यामलिकां ? यूयं न वादयत । तदावादयत तूर्यम् ।

( गन्धर्वकास्तथा कुर्वन्ति । )

( यामलिका हस्तावुत्क्षिप्य नृत्यति । )

( शबरस्तस्याः पृष्ठतः तन्मस्तकोपरि छत्राकारौ करौ कृत्वा मुखं दन्तांश्च वक्रीकुर्वन् कटीं नर्तयति । )

( मुखवस्त्राणि पिधाय सर्वे हसन्ति । )

रौहिणेयः—( स्वगतं ) अहो ! शबरस्य कपटपटिमा । तदहं सांप्रतं स्वचिन्तितमनुतिष्ठामि । ( इति निष्क्रान्तः । )

श्रेष्ठी—( विहस्य ) रत्नाङ्गद ! अहो ! हास्यरसस्य परमप्रकर्षः । तथाहि—

---

(क) रत्नाङ्गद ! एषस्तूष्णीकस्तिष्ठतु ।

(ख) तत्कथं तूर्यं विना नर्तिष्यामि ?।

श्रेष्ठी—अहो ! जनन्या अपत्यस्नेहः, ततो नृत्यतु वराकी । पूरयतु सुचिरसञ्चितमनोरथमालिकाः । यतस्तदेव स्त्रीणां प्रार्थनीयम् ।

आदौ सद्वरवाञ्छा तदनु रुचिरतराः कल्पसंकल्पनास्ता-
स्तद्भोगाभोगलिप्सा प्रतिदिवसमतोऽपत्यभावाभिलाषः ।
इत्थं संपूर्णकामा अतनुसुतनुजोद्वाहहर्षातिरेका-
न्नृत्यन्ति स्कन्धदेशोपरि विधृतगुणास्तारतारं तरुण्यः ॥१२॥

शबरः—(सहर्षमिव) (क) एदाओ दो वि वेवाहिणीओ वधूवरं खंधेहिं ठविय सहरिसं नचन्तीओ सोहंति । ता वामणिगे ! तुमए खंधठिदाए अम्हे वि नचिस्सामो । आलुहसु मम खंधदेसं ।

( वामनिका नाट्येन तत्स्कन्धदेशमध्यारोहति । )

शबरः—(गन्धर्वकान् प्रति) (ख) अले ! गोलीलच्छीओ विव एदाओ सिद्धिणीओ सगुणविवाहेसु नचंति । ता तुज्झे निद्दयं तूलानि वाएध । ( इत्युच्चैस्तूर्यनिनादेन तन्मध्यस्थः शबरो नृत्यति तत्स्कन्धस्थिता च वामनिका । )

( चीरिकासर्पो युवतिकक्षान्तरादधः पतति । )

---

(क) एते द्वे अपि वैवाहिन्यौ वधूवरं स्कन्धे स्थापयित्वा सहर्षं नृत्यन्त्यौ शोभेते तद्वामनिके ! त्वयि स्कन्धगतायां वयमपि नर्तिष्यामः । आरोह मम स्कन्धदेशं ।

(ख) अरे ! गौरीलक्ष्म्याविव एते सिद्धिन्यौ स्वगुणविवाहेषु नृत्यतः । यूयं निर्दयं तूराणि वादयत ।

**सर्वेऽपि**—(सर्पमवलोक्य) सर्पः सर्पः । (इति समयमन्यान्यदिक्षु व्रजन्ति । )

( रौहिणेयः समयमिव कियद्भूमिं गत्वा स्त्रीवेषमुत्सारयति । )

( वरस्तन्मुखमवलोक्योपलक्ष्य च रोदिति । )

**रौहिणेयः**—(साधिक्षेपं) अरे ! तिष्ठ । मा रोदीः । यदि रोदिषि तदाऽनया क्षुरिकया कर्णौ कर्तयिष्यामि । ( इति क्षुरिकां दर्शयति । )

( वरः समयं तूष्णीमास्ते । )

**रौहिणेयः**—यावन्न कोऽपि मामवलोकयति तावत्त्वरिततरं गिरिगह्वरं विशामि । ( इति पश्चादभिमुखमवलोकयन् निष्क्रान्तः । )

**शबरः**—( सर्वतोऽवलोक्य ) ( क ) निग्गदे लोहिणेए । तओ एए जाव भुयगभयभिंभला चिट्ठन्ति ता वामनियाए वरारोहं (वरावहारं) शंशिऊण पलाएमो । ( इति तां स्कन्धात्परित्यज्य सहसा भूमौ, मकारां ) वामनिगे ! शिट्ठिपुत्ते तक्कलेणावहलिदे । ( इत्यभिधाय निष्क्रान्तः )

( वामनिका भूपातपीडया मूर्छामभिनयति । )

**श्रेष्ठी**—( ससंभ्रमं ) अपसरतापसरतास्मादपायस्थानात् । अरे रत्नाङ्गद ! विलोकय क्वापि विषधरम् । अन्यथा दक्ष्यति कमपि ।

---

( क ) निर्गतो रौहिणेयः । तत एते यावद्भुजगभयविह्वलास्तिष्ठन्ति तावद् वामनिकायै वरापहारं शंसित्वा पलायामहे । वामनिके ! श्रेष्ठिपुत्रस्तस्करेणापहृतः ।

रत्नाङ्गदः—( सहसोपसृत्य ) क्व आस्ते ?, क्व दृष्टः ?।
( इति सर्वतोऽवलोकयन् सर्पाकारां तां चीरिकामवलोक्य )*

[श्रेष्ठी—]( स्वगतं ) कथमपिपर्यापर्यः सर्वतः मल्लिप्ता ?, तन्नूनं केनचिद्विचारेण द्रव्यजिघृक्षया चीरिकासर्पधके। ( प्रकाशं ) रत्नाङ्गद ! निश्चितं कस्यचिदप्योर्थेष्टितमदः। तदवलोकय सर्वमप्यागन्तुकं स्वकं च लोकम्। मा कस्यापि वस्त्रादि विभूषणं वा गतं भविष्यति।

रत्नाङ्गदः—( सर्वजनमालोकयापृच्छ्य च श्रेष्ठिनं प्रति ) स्वामिन् ! यथास्थितस्ताऽऽस्ते लोकः।

श्रेष्ठी—( साशङ्कं विलोक्य ) रत्नाङ्गद ! कथं [न] क्वापि विलोक्यते मनोरथः ?। तदवलोकय क्वापि।

रत्नाङ्गदः—आस्ते मातुः पार्श्वे।

( प्रविश्य पटाक्षेपेण )

मनोरमा—( साक्षेपं ) ( क. ) रयणंगय ! अहो ! कोउगं तुम्हाणं। कधं न जाणध तुज्झे गिहप्पवेसलग्गं ?, अभित्थोवावसिट्टा ज्जेव एवं विलंबध। ता दो समाणेध सिग्घं पुत्तयं। साहिज्जइ गिहप्पवेसलग्गं।

श्रेष्ठी—( ससंभ्रमं ) कथं नास्ति स्वत्पार्श्वे सुतः ?।

( क. ) रत्नाङ्गद ! अहो ! कौतुकं युष्माकम्। कथं न जानीथ यूयं गृहप्रवेशलग्नं, यदभ्यवसिता एवं विलम्बध्वे। ततः समानयत शीघ्रं पुत्रकम्। साध्यते गृहप्रवेशलग्नम्।

* अत्र किंचि[illegible]।

मणोरमा—( क ) इधयं य्येव तुम्हपासे मिलीय अहं गिहं गदा ।

श्रेष्ठी—( सरोषं ) अहो ! भवत्याः प्रमादपारवश्यम् । सांप्रतमेव त्वं सुतं स्कन्धमारोप्य नृत्यन्ती भुजगभयान्नष्टा ।

मनोरमा—( सातङ्कं ) (ख) नाथ ! नाहमज्ज नचिदा । न वा करेण पम्हट्ठो पुत्तओ । दट्ठी (ट्ठा) ता (?), किं नेदं ? ।

श्रेष्ठी—निश्चितं तर्हि केनापि त्वत्कपटव्यपदेशेन सुतोऽपजह्रे ।

वामनिका—( चेतनामास्थाय मन्दस्वरं ) ( ग ) एत्थ चिट्ठदि ।

श्रेष्ठी—( समन्ताशं सर्वैः सह तामुपसृत्य ) कथमत्र मनोरथोऽस्ति ? ।

वामनिका—( मन्दस्वरं ) ( घ ) नहि मणोरहो, किंतु गयमणोरहा संभग्गकडियडा मंदभाइणी वामणिया ।

श्रेष्ठी—( सविषादं ) यदि नास्मन्मनोनन्दनो नन्दनस्तत्किमन्येन ? ।

( क ) त्वयैव युष्मत्पार्श्वे मिलित्वा अहं गृहं गता ।

( ख ) नाथ ! नाहमत्र सुप्ता । न वा करेण प्रमृष्टः पुत्रकः । दृष्टा तावत्, किमिदम् ? ।

( ग ) अत्र तिष्ठति ।

( घ ) नहि मनोरथः, किन्तु गतमनोरथा संभग्नकटितटा मन्दभागिनी वामनिका ।

धामनिका—( सबाष्पं ) ( क ) पुत्तओ तक्करेणा-वहरिदो ।

रत्नाङ्गदः—( साक्षेपं ) कथं जानासि ? ।

धामनिका—( ख ) शबरेण निग्गच्छंतेणेदं संसिप अहं खंधादो तथा खोणीए खित्ता जधा सव्वंगेहिं भग्गा । ता हं निब्भग्गिणी कहं भविस्सं ? । (*इति मन्दं मन्दं रोदिति ।*)

रत्नाङ्गदः—( सौत्सुक्यं ) कियद्वेला गतस्य ? ।

धामनिका—( ग ) अहं पीडाए मुच्छिदा तदो न जाणामि ।

श्रेष्ठी—हा वत्स ! हा विनयमण्डन ! हा कुलीन ! * तिलक ! क गतोऽसि । देहि मे प्रतिवचनम् । ( इति सहसा मूर्च्छति । )

मनोरमा—(घ) हा वत्स ! हा सिरीसकुसुमसोमाल ! हा नियसरीरसुंदेरिमसमुज्जासियसपरसुंदेर ! कर्हि गदो ? ।

( क ) पुत्रकस्तस्करेणापहृत. ।

( ख ) शबरेण निर्गच्छतेदं संक्षिप्याहं स्कन्धात्तथा क्षोण्यां क्षिप्ता यथा सर्वाङ्गैर्भग्ना । तदहं निर्भाग्या कथं भविष्यामि ? ।

(ग) अहं पीडया मूर्छिता ततो न जानामि ।

(घ) हा वत्स ! हा शिरीषकुसुमसुकुमार ! हा निजशरीरसौन्दर्यसमुज्ज्वासितस्वपरसौन्दर्य ! कुत्र गत. ? । देहि मे प्रतिवचनम् । दुर्दैवेन मन्दभागिन्या. ।

* अत्र कियाँश्चित्पाठत्रुटितः ।

देहि मे नियवयणं । दुदंसणं मंदभाइणीए । ( इत्युच्चैःस्वरं रोदिति । )

रत्नाङ्गदः—( ससंभ्रमं ) अरे ! शीघ्रं चन्दनैरभिषिञ्चत । कदलीपत्रैर्वीजयत ।

( सर्वेऽपि यथादिष्टमनुतिष्ठन्ति । )

श्रेष्ठी—( चेतनामास्थाय सदैन्यं ) हा विधे ! भग्नोऽस्मन्मनोरथः पुत्रापहारमहादम्भोलिदण्डघातेन । हा वत्स ! क पुनस्त्वामवलोकयिष्ये ? ।

मत्पुण्यद्रुमनव्यपल्लवलसल्लक्ष्मीलताकुड्मल !
मत्सम्प्रभवन्मनोरथवनव्यासेचनाम्भोधर ! ।
वंशव्योमविकाशनाम्बरमणे ! गेहैकचिन्तामणे !
हा वत्स ! क गतोऽसि ? दर्शय निजं वक्त्रं वराकस्य मे ॥१३॥

( इत्युच्चैःस्वरं सर्वे रुदन्ति । पुनः )

श्रेष्ठी —( सदैन्यं )
भग्नाः सर्वमनोरथा धनकृपा जज्ञे वृथा सर्वथा
नष्टदुःखसमर्पणप्रमृतिमगात्सौख्यानि दूरं ययुः ।
शोभावाप्तसुधेन्दुदर्शनसुधाधाराभिराशिश्र मां
यावन्मेर भवद्वियोगदहने प्राणाः प्रयान्ति क्षणात् ॥१४॥

मनोरमा—( साश्रु ) ( क ) पुत्तय ! एक्को च्चिय तुमं मे, ता कहं तुमं विणा पाणे धारइस्सं ? ।

( क ) पुत्रक ! एक एव त्वं मे, तत्कथं त्वां विना प्राणान् धारयिष्ये ? ।

रत्नाङ्गदः—स्वामिन् ! प्रलापपरवशमानसानां भवि-ष्यति कोऽप्युपद्रवः ।

श्रेष्ठी—किमतोऽप्युपद्रवः कोऽपि ? । यदि वा—

उच्चैरतः परं मे भूयांस उपद्रवा भविष्यन्ति ।
अस्तंगतेंऽशुमालिनि सुखेन भूर्व्याप्यते तमसा ॥१५॥

मनोरमा—( क ) पडिहदममंगलं भयवदीणं कुल-देवदाणं पसादेण ।

श्रेष्ठी—( सवैक्लव्यं रत्नाङ्गदं प्रति ) वत्स मनोरथ ! त्वमप्यग्रागच्छ । क्षणमात्मपितुरुत्सङ्गमुपविश ।

मनोरमा—( सास्रं ) ( ख ) नाथ ! न एस पुत्तओ, ता किमेवं सोयपरवसत्तमणुचिट्ठध । संठवध अप्पाणं ।

रत्नाङ्गदः—( साक्षेपं ) कथमबलाजनोचितं कर्म ?

[श्रेष्ठी]—(कोपं धैर्यमालम्ब्य च गृहाभिमुखं कतिचित् पदानि दत्त्वा)

आश्लिष्टं नयनं कलोकपिहितं कम्पोत्कमा सत्वमा
बाष्पाम्भःकणिकानिपातनिबिडे जाते जडे लोचने।
धम्मारूढमिवाखिलं क्षितितलं नष्टो विभागो दिशां
कः संपश्यति वेदमयत्र्मे ? तदहो ! अस्तं समस्तं जगत् ॥

रत्नाङ्गदः—( स्वगतं ) अहो ! महतामपि दुः-खल्वपत्यवियोगः । यतः—

( क ) प्रतिहतममङ्गलं भगवतीनां कुलदेवतानां प्रसादेन ।
( ख ) नाथ ! नैष पुत्रक, तत्किमेवं शोकपरवशत्वमनुतिष्ठथ । ...
...त्मानम् ।

प्राणप्रवासे धनविप्रणाशे
प्रेमप्रयोगे प्रियविप्रयोगे ।
पुत्रापहारापदि च स्थिरोऽपि
को नाम धैर्यं न जहाति जन्तुः ? ॥१७॥ किञ्च—
निर्विघ्नं परितः परमसुमरप्रौढिप्रियम्भावुका
...... तव्यमलाभवत्यपमला तत्पुण्यमेव स्फुटम् ।
तस्यां संततसंततिर्भवति यत्क्रीडत्सुपुत्रात्मका
सा पुण्योपरि मञ्जरी विजयते भूम्ना हृदामोदिनी ॥१८॥
ततः केनाऽपि वाक्यावष्टम्भेन धैर्यमुत्पादयाम्यस्य । यतः—
न तथाद्भुतसंपत्तिः सुखाय संपद्यते मनुष्याणाम् ।
आपन्नानां हि यथा दत्तं धैर्यात्मकं वाक्यम् ॥ १९ ॥
( प्रकाशं )
स्वामिन् ! शोकानलक्रान्तं स्वान्तं मास्म वृथा कृथाः ।
तथा तथा यतिष्येऽहं यथा पुत्रः समेष्यति ॥ २० ॥
तद्गच्छति निशाम्यतां (?) सांप्रतं निशान्तम् ।
श्रेष्ठी—( रत्नाङ्गददत्तहस्तावलम्बः स्वगृहं प्रति परिक्रामति । गृहमवलोक्य पुनः पुत्रस्मरणमभिनीय च )
यत्रस्त्यत्र धनं व्ययेऽप्यनिधनं सौख्याश्रनं काश्चनं
तुङ्गाङ्गास्तुरगा मरुत्प्रसरगाः क्रीडावनं पावनम् ।
एकश्चेन्न मृणालकोमलतनुर्निस्तन्द्रचन्द्राननः
पुत्रस्तन्मम गेहमेतदखिलं भाति श्मशानोपमम् ॥ २१ ॥
रत्नाङ्गदः—( विमृश्य ) स्वामिन् ! यथा वामनिकाग्रे

स कूटपट्टबद्धः सुतापहारमुदाहृतवान्, तथा जाने तेन तस्करानुचरेण भाव्यम् । पश्यताहो ! स पापः केनापि नोपलक्षितः

श्रेष्ठी—( क्षणं विमृश्य सावष्टम्भं ) रत्नाङ्गद ! मत्पुत्रापहारमाचरता तेन राजग्रहः मागेवात्मनः समानिन्ये । ततः किं बहीभिर्वाचोयुक्तिभिः ? ।

दत्त्वात्मीयमगारसारमसमं कृत्वा पणं माणितं
संशोध्य क्षितिमण्डलं प्रतिकुलं क्ष्मापालमाराध्य च ।
तैस्तैर्दुर्घटकूटकोटिघटनैस्तं घट्टयिष्ये तथा—
ऽकम्प्यं पुत्रमयं च यास्यति यथा राजग्रहं तस्करः ॥२२

( स्वजनान् प्रति ) भवद्भिर्न काचिच्चिन्ता कार्या । तद्व्रजत यूयं स्वस्थानम् । ( पुरुषान् प्रति ) अरे ! नयतैनां वापनिकामुत्पाट्य गृहम् । रत्नाङ्गद ! प्रातस्त्वया महाजनमेलापकः कार्यः । वयमपि स्वगृहं प्रविशामः ।

( इति निष्क्रान्ताः सर्वे । )

॥ द्वितीयोऽङ्कः समाप्तः ॥

## ॥ अथ तृतीयोऽङ्कः ॥

( ततः प्रविशति रत्नाङ्गदः । )

रत्नाङ्गदः—( पूर्वाशासम्मुखमवलोक्य ) कथमयमुदयाचलचूलामालम्बते भगवान् गभस्तिमाली ? । तथाहि—

किं सिन्दूररजाः पतन्ति वियतः ? किं वा कुसुम्भोत्कराः?

स कूटपड्डवड्डः सुतापहारमुदाहृतवान्, तथा जाने तेन तस्क-
रानुचरेण भाव्यम् । पश्यताहो ! स पापः केनापि नोपलक्षितः ।

श्रेष्ठी—( क्षणं विमृश्य सावष्टम्भं ) रत्नाङ्गद ! मत्पुत्रा-
पहारमाचरता तेन राजग्रहः प्रागेवात्मनः समानिन्ये । ततः
किं बह्वीभिर्वाचोयुक्तिभिः ? ।

दत्त्वात्मीयमगारसारमसमं कृत्वा पणं प्राणितं
संशोध्य क्षितिमण्डलं प्रतिकलं क्ष्मापालमाराध्य च ।
तैस्तैर्दुर्घटकूटकोटिघटनैस्तं घट्टयिष्ये तथा-
ऽल्पस्यं पुत्रमयं च दास्यति यथा राजग्रहं तस्करः ॥२२॥

( स्वजनान् प्रति ) भवद्भिर्न काचिच्चिन्ता कार्या । तद्व्रजथ
यूयं स्वस्थानम् । ( पुरुषान् प्रति ) अरे ! नयतैनां वामनिका-
मुत्पाट्य गृहम् । रत्नाङ्गद ! प्रातस्त्वया महाजनमेलापकः
कार्यः । वयमपि स्वगृहं प्रविशामः ।

( इति निष्क्रान्ताः सर्वे । )

॥ द्वितीयोऽङ्कः समाप्तः ॥

---

॥ अथ तृतीयोऽङ्कः ॥

---

( ततः प्रविशति रत्नाङ्गदः । )

रत्नाङ्गदः—( पूर्वाशामुखमवलोक्य ) कथमयमुदया-
चलचूलामालम्बते भगवान् गभस्तिमाली ? । तथाहि—

किं सिन्दूरलवाः पतन्ति वियतः ? किं वा कुसुम्भोत्कराः?

कर्णाटीतिलकमभामभिभवन्मभातिकस्तवर्यते ॥ ८ ॥

रत्नाङ्गदः—कथमयं बन्दीवृन्दैरुत्कीर्त्यमानो मगधेश्वरः स्वास्थानमलंकृतवान् ? । तर्हि शीघ्रं यथादिष्टमनुतिष्ठामि । त्वमपि पुनर्दैवपथातिथीभूयाः

( इत्युभावपि निष्क्रान्तौ । )

॥ विष्कम्भकः ॥

---

( ततः प्रविशति सिंहासनोपविष्टो राजचिह्नालंकृतो राजा सिंहलराजसाधारबन्दीप्रभृतिकश्च परिवारः । )

बन्दी—

शौण्डीर्योर्जितगर्जितार्जितजगत्मत्यर्थिपृथ्वीपति-
मोद्दामद्विपकुम्भभेदनमिलन्मुक्ताढ्यधारोद्धरः ।
चित्राविष्कृतपुष्करोत्करधरस्त्वन्मण्डलाग्रः मभो !
दत्ते नः कपिशीर्षरम्यविजयश्रीवासवेश्मभ्रमम् ॥ ९ ॥

अपि च—

यदीयधाराधरदर्शनेऽपि
मत्यर्थिपृथ्वीपतिराजहंसाः ।
दिशः श्रयन्ते भुवि कान्दिशीका
जीयादसौ श्रेणिकभूपतीन्द्रः ॥ १० ॥

राजा—( सप्रमोदं )

पश्यहो ! तस्य शस्यमवलयवलयुतस्यापि कीदृक्चरित्रं
चण्डमद्योतनाम्नः मतिनृपतिभुजागर्वसर्वङ्कषस्य ।

प्रागेत्यास्मिञ्जिघृक्षानिचुलितहृदयो यः स पश्चात्मनष्ट-
स्त्यक्त्वा सैन्याचरण्यं गलपथलुलितभाणितः कान्दिशीकः॥

सिंहलः—देव! तत्रार्थे प्राभवमतापमाकाम्यं प्रगल्भते ।

युष्मत्प्रतापदहनेन विलापितासु
सत्पत्रवल्लिषु विरोधिवधूमुखानि ।
निःश्वासधूमनिचयैः प्रतिबिम्बलग्नै-
र्गण्डेषु नव्यकृतपत्रलतानि भान्ति ॥ १२ ॥

[ ( नेपथ्ये कलकलः ) ]

राजा—(ससंभ्रमं क्षणं कर्णं दत्त्वा सिंहलं (कुन्तलं) प्रति) अरे! द्वारि कः कलकलायते?, गत्वा जानीहि ।

कुन्तलः—आदेशः प्रमाणम् । ( इत्यभिधाय निष्क्रम्य प्रविशति । )

राजा—अरे! ज्ञानः किं निमित्तोऽयं कलकलः? ।

कुन्तलः—देव! समस्तपुरवणिजो गृहीतोपायना देवपादान् दिदृक्षवः प्रतीहारवसुन्धरायां रुद्धाः सन्ति ।

राजा—त्वरितं प्रवेशय ।

कुन्तलः—देव! के के कियन्तः प्रवेश्यन्ताम्? ।

राजा—( सभ्रूक्षेपं ) अरे! कियन्तः किम्? ।

कुन्तलः—( सभयं ) देव! बहवः सन्ति ।

सिंहलः—( साक्षेपं ) कुन्तल! किमत्र प्रष्टव्यम्?, ये केचन द्वित्रा वा बहवः सन्ति ते प्रवेश्यन्ताम् ।

[illegible] दक्षिणदं [illegible] वीणा:
[illegible] निर्विवादं [illegible] देवपादानां [illegible]

राजा—वैतालिक ! यदि न [illegible]
[illegible] ।

बंदी—देव !

[illegible]
[illegible]
[illegible]
[illegible] इति [illegible]

राजा—[illegible]

बंदी—

एषः [illegible] पुरः [illegible]
[illegible] पुरे [illegible] ।
[illegible] निरवधिप्रदान [illegible]—
[illegible] ॥ २४ [illegible]

राजा—किं [illegible] ?।

बंदी—देव ! [illegible] विशेषः [illegible]
न [illegible]
[illegible] ।

राजा—( सहर्षं ) [illegible] ! [illegible]
[illegible] ।

राजा—

अमननिर्भरं तस्य आतस्याजननिर्भरम् ।
प्राणप्रिया प्रजा यस्य पश्यतः पीड्यते परैः ॥ २६ ॥

( पुनः क्षणं विमृश्य सखेदं सकम्पं )

निर्नष्टं मम पौरसौख्यनिकरैर्मन्ये पौरुषं निष्ठिता
सत्कीर्तिः शममाश्रयाय विगताः सर्वे गुणा वर्मणा ।
चौर्येणेन समं परं प्रसरिताः सर्वत्र दुर्नीतयः
दृष्टदुःखभरेण कार्यमधुना सोऽहं पुनः प्राणिमि ॥२७॥

भवतु तावत्, आगच्छन्तु पुराध्यक्षः ।

( ततः प्रविशति कीनाशः कुन्तलश्च । )

कुन्तलः—( उपसृत्य ) देव ! अयं कीनाशः पुराध्यक्षः।

कीनाशः—( प्रणम्य ) एषोऽस्मि, प्रयच्छत कृत्यादेशम्।

राजा—( सक्रोधं साक्षेपं च )

रे रे ! निरक्ष ! रक्षकाधम ! मम प्राणप्रिया पूःप्रजा
येनेत्थमनिमेन सेयमनिशं स्तेनेन निष्पीड्यते ।
त्वं त्वादृश मदीयवेतनधनं प्राप्योऽङ्गनासंगत-
स्त्यक्त्वा नागररक्षणव्यतिकरं निद्रायसे रे! सुखम् ॥२८॥

किञ्च—

स्फूर्जत्पिप्पल निष्कलङ्क......ग्रामाभिरामं पुरं
नित्यं निष्प्रतिरूपरूपमनुमद्वन्द्वैकलीलास्पदम् ।
नानादेशकसौख्यवाञ्छकवणिक्छ्रेणीनिवासाद्भुतं
यस्तस्याप्यहितेन निन्दितदशा स्तेनेन तेने कथम् ? ॥२९॥

राजा—

अजननिर्वरं तस्य जातस्याजननिर्वरम् ।
प्राणप्रिया प्रजा यस्य पश्यतः पीड्यते परैः ॥ २६ ॥

( पुनः क्षणं विमृश्य सशिरःकम्पं )

निर्नष्टं सह पौरसौख्यनिवहैर्मत्पौरुषं निष्ठिता
सत्कीर्तिः सममाज्ञयाथ विगताः सर्वे गुणा शर्मणा ।
कौलीनेन समं परं प्रसरिताः सर्वत्र दुर्नीतयः
प्रश्वदुःखभरेण सार्धमधुना सोऽहं पुनः प्राणिमि ॥२७॥

भवतु तावत्, आगच्छतु पुराध्यक्षः ।

( ततः प्रविशति कीनाशः कुन्तलश्च । )

कुन्तलः—( उपसृत्य ) देव ! अयं कीनाशः पुराध्यक्षः।

कीनाशः—( प्रणम्य ) एषोऽस्मि, प्रयच्छतु कृत्यादेशम्।

राजा—( सक्रोधं साक्षेपं च )

रे रे ! निरत्रप ! रक्षकाधम ! मम प्राणप्रिया पूःप्रजा
प्रेतेद्यमतिमेन सेयमनिशं स्तेनेन निष्पीड्यते ।
त्वं स्वादाय मदीयवेतनधनं प्रायोऽङ्गनासंगत-
स्त्यक्त्वा नागररक्षणव्यतिकरं निद्रायसे रे! सुखम् ॥२८॥

किञ्च—

रक्षूर्जभिष्कल निष्कलङ्कर......ग्रामाभिरामं पुरं
नित्यं निष्प्रतिरूपरूपमनुजद्वन्द्वैकलीलास्पदम् ।
नानादेशकसौख्यवाञ्छरवणिक्छ्रेणीनिवासाद्भुतं
यचस्याप्यहितेन निन्दितदशा स्तेनेन तेने कथम् ? ॥२९॥

महादेव ! यः कोऽपि दुर्लभमूल्यः पुरातनमपि सर्वस्व हार्दं स्वस्तं दाम्पत्यमिवतमाम् । ( इति हस्तमुन्नमयति । )

सिंहल:—( सेनापतिमुखमालोक्य सगर्वं ) कथय कथय चन्द्रमाः सविताप्रभावः सर्वेऽपि ? । विस्पष्टं यदि देवको पालयेन ।

( ततः प्रविशति प्रद्युम्नकुमारोऽभयकुमार । )

सिंहल:—( ससंभ्रम ) एव इमौ महामात्यः । ( पुनः पूर्वं प्रति ) देव ! सार्थपुङ्गवः प्रणमति ।

( राजा सर्वोऽभ्यागतमभिनन्दति । )

अभयकुमारः —( पुरं समन्तत् पथावलोक्य प्रविशति । राजानमवलोक्य स्वगतं ) कथमद्य महाराजो मां न संभावयत्या-सनप्रदानेन ?, आलोकनमात्रेणापि न प्रसादयति । तदु-पमन्तः कापि कालिककोपाटोप इव संलक्ष्यते । तथापि —

रुद्रः पः एकृतकोपभीषणमहाटोपेन कोपादिना ?
कालस्य प्रकटोपममविकटदंष्ट्रे मुखे कोऽविशत् ? ।
अन्तर्विस्फुरदुग्रकोपघटितभ्रूभङ्गभीष्माहति-
र्ज्वालास्फुरदग्निमप्यपचतो यस्य पुरोऽभून्मनुः ॥ ३२ ॥

तथा चायं वणिग्जनः, अयं च पुरारक्षः, नयिपतं भा-र्यं केनापि हेतुना । ( प्रकाशं सिंहलं प्रति अपवार्य ) सिंहल ! किमयं देवः कोपावेशपरागतः ?। किमयं चापी वणिजः स-मागताः ?। किमयं कीनाशः सभय एवास्ते ?।

( सिंहलो मन्त्रिणः कर्णे एवमेव । )

अभयः—( सानुनयं ) देव ! किमेतत् ? । कस्योपरि किं निमित्तोऽयमाक्षेपः ? । तदासनमलंक्रियताम् । ( इति सिंहासनमुपवेशयति । पुनर्नृपं प्रति ) देव ! यद्येवं देवस्य दस्युनिग्रहकर्मणि महानाग्रहस्तदहमप्येनमर्थमाधास्ये ।

राजा—( साधिक्षेपं ) अरे ! यदि भवतोऽपि किमपि सामर्थ्यमस्मिन्नर्थे स्यात्तत्किमीदृगवस्थामाप्नुवन्ति पौराः । तदलमनया संकथया ।

अभयः—( प्रणम्य ) देव ! क्रियतामस्मिन्नर्थे प्रसादः ।

वणिजः—स्वामिन् ! भवत्वेवम् । मन्यतामस्मिन्नर्थे निजमपत्यममात्यपुङ्गवः ।

अभयः—देव !

